तार्थहानिरिति प्रमादपरिहारार्थमेवायं प्रपञ्चः "छलन्निरस्येत्यादि" वचनात्। अतएव नारदोऽपि "सर्व्वेष्वर्थविवादेषु वाक्छले नावसीदति। परस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते"। अस्यार्थः अर्थविवादेषु सर्व्वेषु वाक्छले प्रमादाभिधाने पूर्व्वप्रपञ्चितेऽपि नावसीदति प्रकृतादर्थान्न हीयते। अत्रोदाहरणमात्रं परस्त्रीत्यादि। एतेषु प्रमादाभिधानेऽपि शास्योदण्ड्योऽपि यथा न प्रकृतार्थाद्धीयते इति एवं सर्व्वेष्वर्थविवादेष्वित्यर्थः। अन्यथा परस्त्रीत्यादेरानर्थक्यमेव भवेत्। अर्थविवादेष्वादनान्मन्युकृतेषु प्रकृतार्थादपि हीयतइत्यर्थादुक्तं भवति। यथाऽहमनेन शिरसि ताड़ित इत्यावेद्य भाषादिसमये हस्तेन पादे ताड़ित इति वदन् दण्ड्यः पराजितस्य भवति। मन्युकृतावेशादसदेव ताड़नादिकमयमस्मिन्नारोप्यावेदितवान् धर्म्माधिकरण इति प्रतीतेः। अतएव "दोषानुरूपं संग्राह्यः पुनर्वादो न विद्यते" इति वार्हस्पत्यः पुनर्वादनिषेधोऽपि मन्युकृतव्यवहारविषय एव। संग्राह्योदण्डमित्यर्थात्। असम्भाष्ये सम्भाषणानर्हे विजन इति यावत्। नेच्छेत् श्रुतमप्यश्रुतवत्कुर्य्यात्। राजकार्य्यादिव्याजमुत्पाद्य ग्रामान्तरङ्गच्छेत्। ब्रूहीत्यादि गतार्थम्। अन्यादेशमित्यादौ ब्रूहीत्यादौ च बहुकृत्वोऽपि तथ्यं वदितव्यमिति शावरभाष्योक्तरीत्यास्मिन् प्रकरणे पुनरुक्तिर्नदोष इति भगवान्मेधातिथिराह। क्वचिदर्थविवादेऽप्यर्थहानिः सन्दिग्धार्थमित्यनेन दर्शिता। नारदोऽप्याह "अनिवेद्य तु यो राज्ञे सन्दिग्धेऽर्थे प्रवर्त्तते। प्रसह्य स विनेयः स्यात्तस्य चाप्यर्थो न सिध्यति"। प्रवर्त्तते साधयति बलादिनेत्यर्थः। वृहस्पतिरपि "आहूतप्रपलायी च मौनी साक्षिपराजितः। स्ववाक्यप्रतिपन्नश्च हीनवादी चतुर्विधः"। साक्षिपराजितः साक्षिवचनाद्यः पराजितः, स्ववाक्यप्रतिपन्नः संप्रतिपत्त्युत्तरदाता, अनयोर्दृष्टान्तत्वेनोपादानम्। यथाऽनयोरविप्रतिपन्नार्थहानिस्तथान्ययोरपीत्यर्थः। अत्राप्युत्तरोत्तरहीनताधिक्यप्रतिपादनार्थं चतुर्विधग्रहणन्न परिसङ्ख्यार्थमन्यथान्येषान्तत्कथनं विरुध्येत। कस्मिन् कदा हीनकार्य्यमित्यत्र कालावधिरुक्तस्तेनैव "प्रपलायी त्रिपक्षेण मौनकृत् सप्तभिर्दिनैः। साक्षिभिन्नस्तत्क्षणेन प्रतिपन्नश्च हीयते" इति साक्षिभिन्नस्तत्पराजितः यस्य सामान्यान् साक्षिणो विर्दिश्य पश्चाद्विशिष्य निर्दिशेत् मनुना ज्ञातारः इत्यनेन हीनतयोक्तेः तत्रापि कालावधिं वृहस्पतिरेवाह "साक्षिणस्तु समुद्दिश्य यस्तु तान्न विवादयेत्। त्रिंशद्रात्रात् त्रिपक्षाद्वा तस्य हानिः प्रजायते" इति। दैविकराजिकान्तराये त्ववध्यतिक्रमेऽपि न दोष इत्यप्याह स एव "आचारकरणे दिव्ये कृत्वोपस्थाननिर्णयम्। नोपस्थितो यदा कश्चिच्छलन्तत्र न कारयेत्। दैवराजकृतो दोषस्तस्मिन् काले यदा भवेत्। अवधित्यागमात्रेण न भवेत् स पराजितः"। इति आचारकरणे व्यवहारकरणे। छलन्तत्र न कारयेदिति वदता यत्र वचनेनार्थहानिः प्रतिपादिता तत्रैव पुनर्विवादाभावोऽन्यत्र तु हीनतानिमित्तं दण्डं कृत्वा पुनर्वादः प्रवर्त्तनीय एवेति सूचितम्। यत आह कात्यायनः "पलायनानुत्तरत्वादन्यपक्षाश्रयेण वा। हीनस्य गृह्यते वादो न स्ववाक्यजितस्य च"। स्ववाक्यजितस्येति प्रकृतार्थहानिनिमित्तोपलक्षणन्तेनैव विवृतमिदम् "यो हीनचिह्नेन जितस्तस्योद्धारं विदुर्बुधाः। स्ववाक्यहीनोयस्तु स्यात् तस्योद्धारो न विद्यते" इति। उद्धारः पुनर्व्यवहारः। अत्रापि स्ववाक्यहीन इति प्रकृतार्थहानिनिमित्तोपलक्षणम्। विवादमुपक्रम्य राजानं वञ्चयित्वाऽन्योन्यं यौ वादिप्रतिवादिनौ स्वयमेव विवादान्निवर्त्तेते तयोरुभयोरपि दण्ड्यत्वमाह वृहस्पतिः "पूर्व्वोत्तरे सन्निविष्टे विचारे सम्प्रवर्त्तिते। प्रशमं ये मिथो यान्ति दाप्यास्ते द्विगुणन्दमम्"। मिथ इत्यनेन राज्ञो निवेदनमकृत्वैवाऽन्योन्यशमयानोक्तेः राज्ञेऽनिवेदनमवगम्यते। कात्यायनस्तु स्पष्टमाह "आवेद्याप्रगृहीतार्थं प्रशमं यान्ति ये मिथः। सर्व्वे द्विगुणदण्डाः स्युर्विप्रलम्भान्नृपस्य ते" इति। द्विगुणो दण्डस्तु पराजयनिमित्तदण्डापेक्षया न तु विवादास्पदीभूतद्रव्यापेक्षया अद्रव्यविवादेष्वव्याप्तेः। राज्ञे निवेद्याऽन्योन्यरुच्या राजानुरोधेनैव वा सन्धिकरणे तु न दण्ड इत्यर्थसिद्धं स्फुटीकृतं वृहस्पतिना "पूर्व्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्य्यनिर्णये। द्वयोरुत्तरयोः सन्धिः स्याद्:खण्डयोरिव। साक्षिसम्भिकल्पस्तु भवेत्तत्रोभयोरपि। दोलायमानौ यौ सन्धिं कुर्य्यातान्तौ विचक्षणौ। प्रमाणसमता यत्र भेदः शास्त्रचरित्रयाः। तत्र राजाज्ञया सन्धिरुभयोरपि शस्यते। धर्मार्थोपग्रहः कीर्त्तिर्भवेत्तास्येन भूभुजः। न क्लिश्यन्ते साक्षिसभ्या वैरञ्च विनिवर्त्तते। निग्रहानुग्रहं दण्डं धर्म्मं प्राप्य यशोऽयशः। विग्रहाज्जायते नृणां पुनर्दोषस्तथैव च। तस्मात्कुलगणाध्यक्षधर्मज्ञाः समदृष्टयः। अद्वेषलोभाद्यद्ब्रूयु-